**સૂર્યસ્તોત્ર મહામન્ત્રં**

-----------------------------------

ઓં સત્ગુરુભ્યો નમઃ

અસ્ય શ્રી સૂર્યસ્તોત્રમહામન્ત્રસ્ય અગસ્ત્ય ઋષિ
અનુષ્ટુપ્પ્ છન્દઃ સૂર્યનારાયણો દેવતા, સૂં બીજં
રીં શક્તિઃ યં કીલકં, સૂર્ય પ્રસાદસિદ્ધ્યર્ત્થે જપે વિનિયોગઃ

આદિત્યાય અંગુષ્ટાભ્યાં નમઃ
અર્ક્કાય તર્જ્જનીભ્યાં નમઃ
દિવાકરાય મદ્ધ્યમાભ્યં નમઃ
પ્રભાકરાય અનામિકાભ્યાં નમઃ
સહસ્રકિરણાય કનિષ્ઠિકાભ્યાં નમઃ
માર્ત્તાણ્ડાય કરતલકરપૃષ્ઠાભ્યાં નમઃ

આદિત્યાય હૃદયાય નમઃ
અર્ક્કાય શિરસે સ્વાહ
દિવાકરાય શિખાયૈ વષટ્
પ્રભાકરાય કવચાય હૂં
સહસ્રકિરણાય નેત્રાભ્યાં વૌષટ્
માર્ત્તાણ્ડાય અસ્ત્રાય ફટ્
ભૂર્ભુવસ્સુવરોમિતિ દિકબન્ધઃ

**ધ્યાનં**

ધ્યાયેત્ સૂર્યમનન્તશક્તિકિરણં
તેજોમયં ભાસ્કરં
ભક્તાનામભયપ્રદં દિનકરં
જ્યોતિર્મયં શઙ્કરં
આદિત્યં જગદીશમચ્યુતમજં
ત્રૈલોક્યચૂડામણિં

ભક્તાભીષ્ટવરપ્રદં દિનમણિં
માર્ત્તાણ્ડમાદ્યં શુભં (1)

બ્રહ્માવિષ્ણુશ્ચરુદ્રશ્ચ
ઈશ્વરશ્ચ સદાશિવઃ
પઞ્ચબ્રહ્મમયાકારા યેન
જાતા નમામિ તં (2)

કાલાત્મા સર્વ્વભૂતાત્મા
વેદાત્મા વિશ્વતોમુખઃ
જન્મમૃત્યુ જરાવ્યાધિ
સંસારભયનાશનઃ (3)

બ્રહ્મસ્વરૂપ ઉદયે
મદ્ધ્યાહ્ને તુ સદાશિવઃ
અસ્તકાલે સ્વયં વિષ્ણુઃ
ત્રયીમૂર્ત્તિર્ દિવાકરઃ (4)

એકચક્રરથો યસ્ય
દિવ્યઃકનકભૂષિતઃ
સોઽયં ભવતુ નઃ પ્રીતઃ
પત્મહસ્તો દિવાકરઃ (5)

પત્મહસ્તઃ પરંજ્યોતિઃ
પરેશાયનમો નમઃ
અણ્ડયોને કર્મ્મસાક્ષિન્
આદિત્યાય નમોનમઃ (6)

કમલાસનદેવેશ
કર્મ્મસાક્ષિન્ નમોનમઃ
ધર્મ્મમૂર્ત્તે દયામૂર્ત્તે
તત્વમૂર્ત્તે નમોનમઃ (7)

સકલેશાય સૂર્યાય
સર્વ્વયજ્ઞાય નમોનમઃ
ક્ષયાપસ્મારગુલ્માદિ
વ્યાધિહન્ત્રે નમોનમઃ (8)

સર્વ્વજ્વરહરશ્ચૈવ
સર્વ્વરોગનિવારણં
સ્તોત્રમેતત્ શિવપ્રોક્તં
સર્વ્વસિદ્ધિકરં પરં (9)